श्रीव्यासप्रशस्तयः

HOMAGES TO VYĀSA

Dr. V. RAGHAVAN

PURANA DEPARTMENT
ALL-INDIA KASIRAJA TRUST
FORT RAMNAGAR, VARANASI
1963



Image of Vyasa at Varadaraja Temple at Kanci.

INTRODUCTION

The present *śloka-puṣpāñjali* to Vyāsa is a sequel to and outcome of the one I brought out earlier on the occasion of the *Rāma-navamī*, a collection of poets' homages to Vālmīki and the *Rāmāyaṇa*.

Vālmiki and Vyāsa have been the two eyes of the people and their epics the *Rāmāyaṇa* and the *Mahābhārata* have conditioned their mind and lives; the formation of national character, the norms of behaviour and moral standards which the people have striven to uphold, and the hopes and aspirations which have animated them through the centuries of their long history, all these they owe ultimately to these two epics.

In a way, the *Mahābhārata*, as also the personality of Vyāsa, had attained greater magnitude, compared to the *Rāmāyaṇa* and Vālmīki. The *Mahābhārata* had become a veritable thesaurus of wisdom, and Vyāsa is not only the author of this fifth Veda, as the epic has been described, but the codifier of the four Vedas themselves, the promulgator of all the Purāṇas and the expounder of the Vedānta. Indeed, what would be left of the foundations of Indian culture without the contributions associated with his name ?

In this sheaf of homages to Vyāsa there are therefore sections devoted not only to the poet and his epic, inclusive of the Bhagavadgītā, but also to the other literary heritage traditionally associated with the sage, particularly the Vedānta and the Purāṇas.

These homages to Vyāsa and the legacy bequethed by him are taken from the Great Epic itself and its commentaries, from the Purāṇas and the commentaries on some of them, from the classical poets and dramatists, from the S'āstrakāras who expounded the Vedānta (Brahma) Sūtras, inclusive of the great S'aṅkara and the commentators of the different schools of Vedānta. The tributes to *Vyāsa* in person come first; then come those that speak of him particularly with reference to *Veda* and *Vedānta*; this is followed by a section on the *Mahābhārata* and at the end come the verses on *Purāṇas* and their māhātmya. As in the case of the collection on Vālmīki and the *Rāmāyaṇa*, here too unpublished works in manuscripts are as much drawn upon as those in print.

Pandits A. M. Srinivasacharya and S. Sambandan, of the Purāṇa Staff, have assisted me.

In the end is a tabular statement of the *Vyāsas* of the different epochs which will be useful to those who are interested in the concept of Vyāsa and its role in the cultural history of the country. In each age, at each crisis, a Vyāsa is manifested to resurrect Dharma and promulgate the teachings.

There are verses which set forth the biographical and personal details and the different names of Kṛṣṇa Dvaipāyana Vyāsa, son of Parāśara, figuring as a character in his own epic. There are then the verses which try to picture his personality, his sage-appearance, and his sanctifying and uplifting presence. He is the archetype of a *muni*, says the Gītā. In the epic itself and elsewhere, it is said that he is verily Lord Nārāyaṇa Himself, as none else could have composed the *Mahābhārata*.

The poets' homages are especially noteworthy for the play of their fancy and the variety of ways by which they bring out the greatness of Vyāsa and his contributions. To the poets, the two epics are the primary exemplars of their art, and some of their tributes are jointly to both Vālmiki and Vyāsa, whom Dhanapāla aptly likens to the Sun and the Moon.

The best of the tributes are those poured on the *Mahābhārata*, which is not only a Kāvya, but also a Śāstra and a Śāstra of all the four Puruṣārthas. But for the Bhārata, the world would have been blind, as the epic itself says, and man would have been a mere machine, as Daṇḍin puts it. According to the epic's own words, Truth and Immortality constitute the body of the Bhārata and to those who have listened to it, there is no more enjoyable thing that will appeal. "Uphold *Dharma*, from it will flow whatever you need of *Artha* and *Kāma*" proclaims the *Bhārata-Sāvitrī*. Every work is contained in it, as everything is, in ether; and there is no story going about which does not derive sustenance from it, even as there is no body which can subsist without food. It is a treasure-house even as the ocean or the Himālayas. Indeed, what is in it is found elsewhere and what is not in it cannot be found elsewhere.

The tributes to the Purāṇas mention the all-comprehensive nature of this literature; they emphasise that not only do the Purāṇas supplement the Vedas but they are also necessary to understand the Vedas properly; they extol the Purāṇa as of equal or even greater importance then the Vedas; according to the *Skānda*, the Purāṇa contains things not contained in *Śruti* and *Smṛti* and the

Matsya says that the Purāṇas issued forth from Brahman's face first and then the four Vedas. Especially for the Kali age, there is no greater *Dharma* than their propagation and reading and listening to their exposition.

It is the last mentioned, the importance of the Purāṇa, that has prompted His Highness the Maharajah of Banaras and the All-India Kasiraja Trust established by him to launch upon the work of preparing critical editions of the Purāṇas, of their study and the bringing of their teachings to the people at large. The critical edition of the Purāṇas is one of the largest Indological research undertakings of India and yet it is not the only objective of the Trust. The aim is to establish under the Trust a full VYĀSA INSTITUTE which will devote its attention to all the departments of Vyāsa's contributions as seen in the homages collected in this volume.

The venue of the Kasiraja Trust, Ramnagar, goes by the name VYASA-KĀŚI, the place hallowed by Vyāsa's sojourn. It is in front of the Vyāsa shrine here that some time back, when His Highness and the undersigned were discussing about this Purāṇa project, the latter was persuaded to co-operate in the dedicated task of discharging this greatest and most difficult of the accumulated Ṛṣi-ṛṇas. May VYĀSA himself help us to attain JAYA in this task!

नमो भगवते तस्मै व्यासायामिततेजसे।
यस्य प्रसादाद्वक्ष्यामः पुराणोद्धारसद्धुरम्॥

V. RAGHAVAN

जयति पराशरसूनुः सत्यवतीहृदयनन्दनो व्यासः ।
यस्यास्यकमलकोशे वाङ्मयमसृतं पिबति लोकः (जगत् पिबति)॥

—पूना म. भा. आ. fn. p. 3; ह. वं. १. १. ३
वायु. १. २. भविष्य. १. १. २

व्यासं वसिष्ठनप्तारं शक्तेः पौत्रमकल्मषम् ।
पराशरात्मजं वन्दे शुकतातं तपोनिधिम् ॥
व्यासाय विष्णुरूपाय व्यासरूपाय विष्णवे ।
नमो वै ब्रह्मनिधये वासिष्ठाय नमो नमः ॥

—पूना म. भा. आ. fn. p. 4

अचतुर्वदनो ब्रह्मा द्विबाहुरपरो हरिः ।
अफाललोचनः शंभुः भगवान् बादरायणः ॥

—पूना म. भा. आ. fn. p. 4

अश्रश्यामः पिङ्गजटाबद्धकलापः
प्रांशुर्दण्डी कृष्णमृगत्वक्परिधानः ।
सर्वान् लोकान् पावयमानः कविमुख्यः
पाराशर्यः परमसुरूपं विवृणोतु ॥

—पूना म. भा. आ. fn. p. 4

नमो भगवते तस्मै व्यासायामिततेजसे ।
यस्य प्रसादाद्वक्ष्यामि नारायणकथामिमाम् ॥

—कुम्भ० म. भा. आ० १. ३२

तपोविशिष्टादपि वै वसिष्ठान्मुनिपुङ्गवात् ।
मन्ये श्रेष्ठतमं त्वां वै रहस्यज्ञानवेदनात् ॥

जन्मप्रभृति सत्यां ते वेद्मि गां ब्रह्मवादिनीम् ।
त्वया च काव्यमित्युक्तं तस्मात्काव्यं भविष्यति ॥

अस्य काव्यस्य कवयो न समर्था विशेषणे ।
विशेषणे गृहस्थस्य शेषास्त्रय इवाश्रमाः ॥

जडान्धबधिरोन्मत्तं तमोभूतं जगद्भवेत् ।
यदि ज्ञानहुताशेन त्वया नोज्ज्वलितं भवेत् ॥

तमसान्धस्य लोकस्य वेष्टितस्य स्वकर्मभिः ।
ज्ञानाञ्जनशलाकाभिर्बुद्धिनेत्रोत्सवः कृतः ॥

धर्मार्थकाममोक्षार्थैः समासव्यासकीर्तनैः ।
त्वया भारतसूर्येण नृणां विनिहतं तमः ॥

पुराणपूर्णचन्द्रेण श्रुतिज्योत्स्नाप्रकाशिना ।
नृणां कुमुदसौम्यानां कृतं बुद्धिप्रसादनम् ॥

इतिहासप्रदीपेन मोहावरणघातिना ।
लोकगर्भगृहं कृत्स्नं यथावत् संप्रकाशितम् ॥

—कुम्भ. म. भा. आ. १. ९६-१

यो व्यस्य वेदांश्चतुरस्तपसा भगवानृषिः ।
लोके व्यासत्वमापेदे काष्ण्यात् कृष्णत्वमेव च ॥

—कुम्भ. म. भा. आ. ११४.

कृष्णद्वैपायनं व्यासं विद्धि नारायणं प्रभुम् ।
को ह्यन्यः पुण्डरीकाक्षान्महाभारतकृद्भवेत् ॥
धर्मान्नानाविधांश्चैव को ब्रूयात्तमृते प्रभुम् ॥

—कुम्भ. म. भा. शा. ३५६. ११ ; पद्म. ५. १. ४३

जज्ञे बहुज्ञं परमत्युदारं यं द्वीपमध्ये सुतमात्मवन्तम् ।
पराशरात्सत्यवती महर्षिं तस्मै नमोऽज्ञानतमोनुदाय ॥
पितामहाद्यं प्रवदन्ति षष्ठं महर्षिमार्षेयविभूतियुक्तम् ।
नारायणस्यांशजमेकपुत्रं द्वैपायनं वेदमहानिधानम् ॥
तमादिकालेषु महाविभूतिर्नारायणो ब्रह्म महानिधानम् ।
ससर्ज पुत्रार्थमुदारतेजा व्यासं महात्मानमजं पुराणम् ॥

—कुम्भ. म. भा. शा. ३५९, ४-६

अथान्तरतमा नाम सुतो वाक्सम्भवः प्रभोः ।
भूतभव्यभविष्यज्ञः सत्यवादी दृढव्रतः ॥
अपान्तरतमाश्चैव वेदाचार्यस्स उच्यते ।
प्राचीनगर्भं तमृषिं प्रवदन्तीह केचन ॥

—कुम्भ. म. भा. शा. ३५९.३९-६६

मुनीनामप्यहं व्यासः ।

—भगवद्गीतायाम् १०. ३७

कुरुक्षेत्रे समासीनं व्यासं मतिमतां वरम् ।
महाभारतकर्तारं सर्वशास्त्रविशारदम् ॥

अध्यात्मनिष्ठं सर्वज्ञं सर्वभूतहिते रतम् ।
पुराणागमवक्तारं वेदवेदाङ्गपारगम् ॥
पराशरसुतं शान्तं पद्मपत्रायतेक्षणम् ।
द्रष्टुमभ्याययुः प्रीत्या मुनयः संशितव्रताः ॥

—ब्रह्मपु. २६. ६-८

इतिहासपुराणज्ञं वेदवेदाङ्गपारगम् ॥
सर्वशास्त्रार्थतत्त्वज्ञं पराशरसुतं प्रभुम् ।
गुरुं प्रणम्य वक्ष्यामि पुराणं वेदसंमितम् ।

—ब्रह्मपु. १. २८, २९

सर्वज्ञस्त्वं महाभाग देवेष्विव बृहस्पतिः ।
नमस्यामो महाप्राज्ञं ब्रह्मिष्ठं त्वां महामुनिम् ॥
येन त्वया तु वेदार्था भारते प्रकटीकृताः ।
कः शक्नोति गुणान् वक्तुं तव सर्वान् महामुने ॥
अधीत्य चतुरो वेदान् साङ्गान् व्याकरणानि च ।
कृतवान् भारतं शास्त्रं तस्मै ज्ञानात्मने नमः ॥
नमोऽस्तु ते व्यास विशालबुद्धे फुल्लारविन्दायतपत्रनेत्र ।
येन त्वया भारततैलपूर्णः प्रज्वालितो ज्ञानमयप्रदीपः ॥
अज्ञानतिमिरान्धानां भ्रामितानां कुदृष्टिभिः ।
ज्ञानाञ्जनशलाकेन त्वया चोन्मीलिता दृशः ॥

—ब्रह्मपु. २४५. ८-२१

पितृणां मानसी कन्या वासवी समपद्यत ।
अपध्याता च पितृभिर्मत्स्ययोनौ बभूव सा ॥
अरणीव हुताशस्य निमित्तं यस्य जन्मनः ।
तस्यां जातो महायोगी व्यासो वेदविदां वरः ॥
तस्मै भगवते कृत्वा नमो व्यासाय वेधसे ।
पुरुषाय पुराणाय भृगुवाक्यप्रवर्तिने ॥
मानुषच्छद्मरूपाय विष्णवे प्रभविष्णवे ।
जातमात्रं च यं वेद उपतस्थे ससंग्रहः ॥
धर्ममेव पुरस्कृत्य जातूकर्ण्यादवाप तम् ।
मतिं मन्थानमाविध्य येनासौ श्रुतिसागरात् ॥
प्रकाशं जनितो लोके महाभारतचन्द्रमाः ।
वेदद्रुमश्च यं प्राप्य सशाखः समपद्यत ॥
भूमिकालगुणान् प्राप्य बहुशाखो यथा द्रुमः ।

—वायुपु. १. ४०-४१

कृष्णद्वैपायनं व्यासं विद्धि नारायणं प्रिये ।

—मत्स्यपु. १८५. ३०

वेदमेकं चतुर्भेदं कृत्वा शाखाशतैर्विभुः ।
करोति बहुलं भूयो वेदव्यासस्वरूपभाक् ॥

—विष्णुपु. ३. २. ५७

द्वापरे द्वापरे विष्णुर्व्यासरूपी महामुने ।
वेदमेकं सुबहुधा कुरुते जगतो हितम् ॥

—विष्णुपु. ३. ३. ५

तस्मै व्यासाय मुनये सर्वज्ञाय महर्षये ।
पाराशर्याय शान्ताय नमो नारायणात्मने ॥

—कूर्मपु

Granthappura Catalogue, Trivandrum 110

ततस्सप्तदशे जातः सत्यवत्याः पराशरात् ।
चक्रे वेदतरोः शाखा दृष्ट्वा पुंसोऽल्पमेधसः ॥ २ ॥

—भागवते १.३.२१

द्वापरे समनुप्राप्ते तृतीये युगपर्यये ।
जातः पराशराद्योगी वासव्यां कलया हरेः ॥ १४ ॥

—भागवते १. ४. १४

नमस्तस्मै भगवते व्यासायामिततेजसे ।
पपुर्ज्ञानमयं सौम्या यन्मुखाम्बुरुहासवम् ॥

—भागवते २. ४. २४

कालेन मीलितधियामवमृश्य नृणां
स्तोकायुषां स्वनिगमो बत दूरपारः ।
आविर्हितस्त्वनुयुगं स हि सत्यवत्यां
वेदद्रुमं विटपशो विभजिष्यति स्म ॥ ३६ ॥

—भागवते २. ७. ३६

अस्मिन्नप्यन्तरे ब्रह्मन् भगवाँल्लोकभावनः ।
ब्रह्मेशाद्यैर्लोकपालैर्याचितो धर्मगुप्तये ॥ ४८ ॥
पराशरात्सत्यवत्यामंशांशकलया विभुः ।
अवतीर्णो महाभाग वेदं चक्रे चतुर्विधम् ॥ ४९ ॥

ऋगथर्वयजुस्साम्नां राशीनुद्धृत्य वर्गशः ।
चतस्रः संहिताश्चक्रे मन्त्रैर्मणिगणा इव ॥ ५० ॥

—भागवते १२. ६. ४८-५०

तं वेदशास्त्रपरिनिष्ठितशुद्धबुद्धिं
चर्माम्बरं सुरमुनीन्द्रनुतं कवीन्द्रम् ।
कृष्णत्विषं कनकपिङ्गजटाकलापं
व्यासं नमामि शिरसा तिलकं मुनीनाम् ॥

—ब्रह्माण्डपुराणान्तर्गतविरजोमाहात्म्ये
India Office Catalogue, London 6679

वामे कमण्डलुं विभ्रद्दक्षिणे दण्डमुत्तमम् ।
पिशङ्गीभिर्जटाभिश्च राजितो महसां चयः ॥
द्वीपे जातो यतो बालस्तेन द्वैपायनोऽभवत् ।
वेदशाखाविभजनाद्वेदव्यासः प्रकीर्तितः ॥

—शिवपुराणे उमासंहितायाम् ४४. ३९, ४४

पराशरस्य दायादः श्रीमान् सत्यवतीसुतः ।
ब्रह्मर्षिः स च धर्मात्मा कालयोगविदां वरः ॥

—शिवपुराणे सनत्कुमारसंहितायाम्
Asiatic Society Catalogue, Calcutta V. 3543

संक्षिप्य स पुनर्वेदान् चतुर्धा कृतवान् मुनिः ।
व्यस्तवेदतया लोके वेदव्यास इति श्रुतः ॥

पुराणमपि संक्षिप्तं चतुर्लक्षप्रमाणतः ।
अद्यापि देवलोके तत् शतकोटिप्रविस्तरम् ॥

—शिवपुराणस्थसनत्कुमारसंहिताटीकायाम्
Asiatic Society Catalogue, Calcutta V. 3546

एतस्मिन् समये व्यासो भस्मभूषितमस्तकः ।
रुद्राक्षाभरणश्चायात् जटाजूटविभूषितः ॥
पञ्चाक्षरं जपन् मन्त्रं शिवप्रेमसमाकुलः ।
तेजसां च स्वयं राशिस्साक्षाद्धर्म इवापरः ॥

—शिवपु. शतरुद्रीये ३७. २२,२३

द्वापरान्तेषु विश्वात्मा विष्णुर्विश्वंभरः प्रभुः ।
व्यासनाम्ना चरत्यस्मिन्नवतीर्य महीतले ॥
एवं व्यस्ताश्च वेदाश्च द्वापरे द्वापरे द्विजाः ।
निर्मितानि पुराणानि अन्यानि च ततः परम् ॥
स पुनर्द्वापरे चास्मिन् कृष्णद्वैपायनाख्यया ।
अरण्यामिव हव्याशी सत्यवत्यामजायत ॥
संक्षिप्य स पुनर्वेदान् चतुर्धा कृतवान् मुनिः ।
व्यस्तवेदतया लोके वेदव्यास इति श्रुतः ॥

—शिवपु. वायुसं० १. ३४-३७

कृष्णद्वैपायनो व्यासः विष्णुर्नारायणस्स्वयम् ॥
अपान्तरतमाः पूर्वं स्वेच्छया ह्यभवद्धरिः ।

—कूर्मपु. १. ५१. ४८, ४९

पाराशर्यं परमपुरुषं विश्ववेदैकयोनिं
विद्याधारं विपुलमतिदं वेदवेदान्तवेद्यम् ।
शश्वच्छान्तं स्वमतिविषयं शुद्धतेजोविशालं
वेदव्यासं विततयशसं सर्वदाहं नमामि ॥

—पद्मपु. १.१.१९. नरसिंहपु. १.२५. स्कान्दे २.८.१.२४

युगे युगेऽल्पकान् धर्मान् निरीक्ष्य मधुसूदनः ।
वेदव्यासस्वरूपेण वेदभागं करोति वै ॥
वेदव्यासमुनिः साक्षान्नारायण इति द्विजाः ।
शुश्रुमः सर्वशास्त्रेषु ..... ॥

—नारदीयपु. १.१७, १८

अमृतपरमपूर्वं भारतीकामधेनुं
श्रुतिगणकृतवत्सो व्यासदेवो दुदोह ।
अतिरुचिरपुराणं ब्रह्मवैवर्तमेतत्
पिबत पिबत मुग्धा दुग्धमक्षय्यमिष्टम् ॥

—ब्रह्मवैवर्तपु. १.१.२

स प्राप निर्मलं ज्ञानं प्रमादध्वंसकारणम् ॥
पुराणसूत्रं श्रुत्वाथ व्यासः कृष्णकलोद्भवः ।
त्वां सिषेवे च दध्यौ च शतवर्षं च पुष्करे ॥
तदा त्वत्तो वरं प्राप्य स कवीन्द्रो बभूव ह ।
तदा वेदविभागं च पुराणानि चकार ह ॥

—ब्रह्मवैवर्तपु. २.५.२४-२६

कृष्णस्य मम वीर्याणि कृष्णद्वैपायनादयः ।
गास्यन्ति बहुधा ब्रह्मन् सद्यः पापहराणि हि ॥
कृष्णद्वैपायनो भूत्वा पराशरमुनेः सुतः ।
शाखाविभागं वेदस्य करिष्यामि तरोरिव ॥

—स्कान्दे २.९.१८.३९, ४०

उत्तरे केसरे व्यासं न्यसेद्गणपतिं ततः ।
तत्र व्यासो विशालाक्षः कृष्णवर्णः सिताम्बरः ॥
द्विभुजो धृतवेदश्च सुपिशंगजटाधरः ।
सितयज्ञोपवीतश्च कर्तव्यः सपवित्रकः ॥

—स्कान्दे पूजामण्डलरचनाविधौ २.९ २७,३७,३८

विष्णोरंशो मुनिर्जातस्सत्यवत्यां पराशरात् ।
विभज्य वेदांश्चतुरश्शिष्यानध्यापयत्पुरा ॥

—देवीभा. माहात्म्ये १. १४

श्रीमन्मुनिगणावर्ण्यं विद्यानां निधिमव्ययम् ।
स्निग्धनीरदसङ्काशं वेदव्यासमकल्मषम् ॥
वेदव्यासं महात्मानं सरस्वत्या (स्प) दे शुभे ।
शतरुद्रीयमाहात्म्यं पप्रच्छुर्मुनयस्तदा ॥

—स्कान्दे शतरुद्रीयमाहात्म्ये G.O. Mss. Library, Madras. R. 922(a)

स च नारायणस्यांशो भगवान् बादरायणः ।
दृष्ट्वा मन्दमतीन् मर्त्यान् कृपया परयान्वितः ॥
वेदान्तार्थस्तु सर्वेषां नाना भाति न चैकधा ।
अतस्तेन कथं ब्रह्म जानात्यल्पमतिः पुमान् ॥

इति संचिन्त्य मतिमान् पुनः कारुणिकोत्तमः ।
सूत्रयामास वेदान्तवाक्यार्थं शंकराज्ञया ॥

—व्यासतात्पर्यनिर्णयोद्धृत-शैव-एकादशरुद्रसंहितायाम्

व्यासं स्निग्धाम्बुदाभासं निगमावासमानसम् ।
ज्ञानानन्दकलाभ्यासं तं वन्देऽजिनवाससम् ॥

—गोपालक्षेत्रमाहात्म्ये G. O. Mss. Library, Madras R. No. 2975

आविर्भूताय हरये सत्यवत्यां पराशरात् ।
व्यासाय वेदसिद्धान्तगायकाय नमो नमः ॥

स्थानन्दूरपुराणसमुच्चये Granthappura Catalogue, Trivandrum 521

प्रायशो मुनयस्सर्वे केवलात्महितोद्यताः ।
द्वैपायनस्तु भगवान् सर्वलोकहितोद्यतः ॥

—पुराणसंक्षेपे (इतिहासोत्तमे)
Granthappura Catalogue, Trivandrum 190

वेदपद्मनिकरस्य भास्करं
देवदेवसदृशं घृणानिधिम् ।
व्यासमिष्टफलदं गुरुं नुमः
शोकमोहविषवेगभेषजम् ॥

—पुराणसारे Curator's Office Catalogue, Trivandrum 165.

व्याचक्रे चित्तशुद्ध्यै शतपथहृदयं यः पुराणेतिहासैः
चित्तैकाग्र्यैकबीजं फणिपतिविहितं योगशास्त्रं च भाष्यैः ।
मूलध्वान्तापहृत्यै श्रुतिशिखरगिरां ब्रह्मसूत्रै रहस्यं
वेदव्यासः स भूयादखिलभवभयध्वस्तयेऽस्मद्विधानाम् ॥

—नीलकण्ठकृतायां हरिवंशव्याख्यायामुपक्रमे ३

व्यासायाप्रतिमेतिहासरचनोल्लासाय दुर्वादिनां
त्रासायासकराय सत्सु कृतविश्वासाय दोषद्विषे ।
भासा यामुनरम्यतोयसदृशायासायमासेबिने
दासायाभयनाशिमध्वगुरुहृद्वासाय तुभ्यं नमः ॥

अगाधव्यासबोधाब्धौ निरूढाश्शब्दराशयः ।
न विवेचयितुं शक्यं मादृग्भिर्मन्दबुद्धिभिः ॥

योऽक्षरत्यागयोगाभ्यां क्षत्रं शूद्राभिधा (धां ?)? व्यधात् ।
तस्य व्यासस्य वचसो वैदग्धीं वेत्ति कः कविः ॥

—वादिराजतीर्थस्य महाभा. व्याख्यायां लक्षालङ्कारे
G. O. Mss. Library, Madras R. No. 436

उपास्ते शब्दसस्यानां रसे वाल्मीकिभानुना ।
.....षु सिञ्चन्तं व्यासचन्द्रमसं भजे ॥

महते भारतायास्मै वेदसारात्मने नमः ।
यस्य स्तुतौ प्रस्तुतौ वा भवेदन्यच्च भारतम् ॥

ऋषेरतीव पूर्णस्य निर्गमे मार्गमिच्छतः ।
बोधाम्बुधेः परीवाहं कोऽवगाहेत भारतम् ॥

वैचित्रीरुचिसंक्षेपो विस्तरोत्पादनेच्छया ।
मुनिर्व्याचष्ट शिष्येभ्यो भिन्ना भारतसंहिताः ॥

—वरदविदुषः भारतव्याख्यायां ज्ञानपञ्च
Granthappura Catalogue, Trivandrum 14

यद्विज्ञानमहाव्योम्नि क्रियते (?) तच्चराचरम् ।
तस्मै ज्ञेयदरिद्राय नमो भारतवेधसे ॥

भारतव्याख्यायाम् (सभापर्वणि) Sarasvati Mahal, Tanjore 8665

विभज्य वेदं च तदर्थजातं चक्रं परामृश्य पुनः पुराणम् ।
तदीयमर्थं च विकृष्य चक्रे यो भारतं तत्र मनो ममास्ताम् ॥

—जगदीशचक्रवर्तिकृतायां महाभारतटीकायां सभापर्वणि
Asiatic Society Catalogue, Calcutta V. 3404

द्वैपायनपदाम्भोजं भक्ताभीष्टसुरद्रुमम् ।
प्रणम्य विदधे टीकां वैराटीं विज्ञतोषिणीम् ॥

—कण्ठाभरणस्य विराटपर्वटीकायाम्
Asiatic Society Catalogue, Calcutta V. 3405

धर्मार्थकामनिर्वाणफलभारमनोहरम् ।
सृजते वाङ्मयं वृक्षं कानीनमुनये नमः ॥

—महाभारततात्पर्यटीकायां ज्ञानदीपिकायाम् उद्योगपर्वणि
Asiatic Society Catalogue, Calcutta V. 3398

अज्ञानतिमिरच्छन्नजगदालोकभानवे ।
व्यासायानन्दसन्दोहशान्ताय मुनये नमः ॥

—अर्जुनमिश्रस्य भारतव्याख्यायाम् अर्थदीपिकायाम् (आनुशासनिके)
Sarasvati Mahal, Tanjore 8654

संरक्षणाय जगतामितिहासरत्नं
यो दर्शयन्निरमिमीत परं मुकुन्दम् ।

द्वैपायनस्स भगवानमलां मनीषां
तन्वीत नो मधुरिपोरपरावतारः ॥

—वेदान्ताचार्यस्य महाभारततात्पर्यरक्षायाम्
G. O. Mss. Library, Madras D. No. 4982

वेदाचार्यमहं वन्दे कृष्णद्वैपायनं मुनिम् ।
वेदोपबृंहणार्थाय भारतं येन निर्मितम् ॥

—महाभारततात्पयसंग्रहे Sarasvati Mahal, Tanjore 7813

सज्जनाम्भोरुहपुषे वेदव्यासाभिधाजुषे ।
तमस्स्तोममुषे तस्मै परस्मै ज्योतिषे नमः ॥

—सुमतीन्द्रयतेः गीताभाष्यव्याख्यायां (भावरत्नकोशे)
G. O. Mss. Library, Madras R. No. 8

शास्त्रेषु भारतं सारं तत्र नामसहस्रकम् ।
वैष्णवं कृष्णगीता च तज्ज्ञानान्मुच्यतेऽञ्जसा ॥
न भारतसमं शास्त्रं कुत एवानयोः समम् ।
भारतं सर्ववेदाश्च तुलामारोपिताः पुरा ॥
देवैर्ब्रह्मादिभिः सर्वैर्ऋषिभिश्च समन्वितैः ।
व्यासस्यैवाज्ञया तत्र त्वत्यरिच्यत भारतम् ॥
महत्त्वाद्भारवत्त्वाच्च महाभारतमुच्यते ।
निरुक्तमस्य यो वेद सर्वपापैः प्रमुच्यते ॥
स्वयं नारायणो देवैर्ब्रह्मरुद्रेन्द्रपूर्वकैः ।
अर्थितो व्यासतां प्राप्य केवलं तत्त्वनिर्णयम् ।
चकार पञ्चमं वेदं महाभारतसंज्ञितम् ॥

इति ब्रह्माण्डे इति श्रीमदानन्दतीर्थभगवत्पादानां गीतातात्पर्यनिर्णये ।

तस्योदारचरित्रमादिकविना व्यासेन तन्मूर्तिना
श्रीमद्भारतसागरे विपलितं (?) विस्तारितं सर्वतः ॥
माहात्म्यं च स्वरूपं च यथा व्याख्यानमादरात् ।
भारते वेदसारे हि तस्य तुष्टिर्हरेर्वचः ॥
अतस्तद्वाक्यरत्नानि स्वसुवर्णपदालये ।
संग्रथ्य भारते मध्ये सद्दशीनां विवृद्धये ॥
वासुदेवमुखाम्भोजात् वचनामृतवन्मणीन् ।
सुधियां ज्ञानसंसिद्धयै यथाशक्ति वयं स्तुमः ॥

—विठ्ठलेश्वरविरचितगीतार्थविवरणे
Asiatic Society Catalogue, Calcutta V. 3303

कृष्णद्वैपायनं वन्दे यन्मुखेन्दुविनिस्सृतम् ।
सहस्रनामपीयूषं पीयतेऽद्यापि मानुषैः ॥

—नीलकण्ठस्य विष्णुसहस्रनामलघुविवरणे
Curator's Office Catalogue, Trivandrum A 1117

तपसा सर्वशास्त्राणां पारदृक्त्वभवत्तनुम् ।
पाराशर्यः स भगवानिति सर्वं समञ्जसम् ॥

—अनन्तनारायणशास्त्रिणः विष्णुसहस्रनामनिरुक्तौ (हरिभक्तिकामधेनौ)
Curator's Office Catalogue, Trivandrum 1115

वेदव्यासमहं वन्दे वेदव्यासैकवेदिनम् ।
वेदव्यासजनारातिं वेदव्यासमुनीनपि ॥ (?)

—विजयध्वजस्य भागवतव्याख्यायां पदरत्नावल्याम्
G.O. Mss. Library, Madras R. No. 3096

अहो भागवताम्भोधिरहो रसमहो रसः । (?)
मां स्वधामानयत्पूर्णं वेदव्यासः कृती हरिः ॥

—राघवानन्दस्य भागवतव्याख्यायां कृष्णपद्याम्
G.O. Mss. Library, Madras R. No. 5205.

नमो भगवते तस्मै व्यासाय प्रत्यगात्मने ।
त्रिलोकी येन जात्यन्धा लब्धा बोधविलोचनम् ॥

—लक्ष्मीधरस्य भागवतव्याख्यायाम् अमृततरङ्गिण्याम्
Granthappura Catalogue, Trivandrum 96

अनुशासतमित्यनाकुलं नयवर्त्माकुलमर्जुनाग्रजम् ।
स्वयमर्थ इवाभिवाञ्छितस्तमभीयाय पराशरात्मजः ॥
मधुरैरवशानि लम्भयन्नपि तिर्यञ्चि शमं निरीक्षितैः ।
परितः पटु बिभ्रदेनसां दहनं धाम विलोकनक्षमम् ॥
सहसोपगतः सविस्मयं तपसां सूतिरसूतिरापदाम् ।
ददृशे जगतीभुजा मुनिः स वपुष्मानिव पुण्यसञ्चयः ॥
ततः शरच्चन्द्रकराभिरामैरुत्सर्पिभिः प्रांशुमिवांशुजालैः ।
बिभ्राणमानीलरुचं पिशङ्गीर्जटास्तडित्वन्तमिवांबुवाहम् ॥
प्रसादलक्ष्मीं दधतं समग्रां वपुःप्रकर्षेण जनातिगेन ।
प्रसह्य चेतस्सु समासजन्तमसंस्तुतानामपि भावमार्द्रम् ॥
अनुद्धताकारतया विविक्तां तन्वन्तमन्तःकरणस्य वृत्तिम् ।
माधुर्यविस्रम्भविशेषभाजा कृतोपसंभाषमिवेक्षितेन ॥

—भारवेः किरातार्जुनीये २. ५४—५६. ३. १—३

नमः सर्वविदे तस्मै व्यासाय कविवेधसे ।
चक्रे पुण्यं सरस्वत्या यो वर्षमिव भारतम् ॥

—बाणभट्टस्य हर्षचरिते १. ३

श्रवणाञ्जलिपुटपेयं विरचितवान् भारताख्यममृतं यः ।
तमहमरागमतृष्णं कृष्णद्वैपायनं वन्दे ॥

—भट्टनारायणस्य वेणीसंहारे १.३

मर्त्ययन्त्रेषु चैतन्यं महाभारतविद्यया ।
अर्पयामास तत्पूर्वं यस्तस्मै मुनये नमः ॥

—आचार्यदण्डिनः अवन्तिसुन्दर्याम् ३

जयत्यखिलसँल्लापरत्नराशिसमुद्भवः ।
भारतामृतसंभूतिः पाराशर्यपयोनिधिः ॥

—अवन्तिसुन्दरीकथासारे १. ४

कृष्णद्वैपायनं व्यासं सर्वभूतहिते रतम् ।
वेदाब्जभास्करं वन्दे शमादिनिलयं मुनिम् ॥
.... (शान्तिदान्त्यालयं मुनिम्)

—शङ्कराचार्यस्य विष्णुसहस्रनामभाष्ये उपक्रमे श्लो. २

नमो नारायणायेदं कृष्णद्वैपायनात्मने ।
यदामुष्यायणा वेदा महाभारतपञ्चमाः ॥

—पराशरभट्टस्य विष्णुसहस्रनामभाष्ये उपक्रमे श्लो. ४

प्रस्तावनादिपुरुषौ रघुकौरववंशयोः ।
वन्दे वाल्मीकिकानीनौ सूर्याचन्द्रमसाविव ॥

—धनपालस्य तिलकमञ्जर्याम् २०

व्यासः क्षमाभृतां श्रेष्ठो वन्द्यः स हिमवानिव ।
सृष्टा गौरीदृशी येन भवे विस्तारिभारता ॥

—त्रिविक्रमभट्टस्य नलचम्प्वाम् १. १२

जगत्प्रदीपयोर्वंशौ सूर्याचन्द्रमसोरपि ।
ययोरुद्दीपितौ वाग्भिस्तौ वन्दे कविपुङ्गवौ ॥
द्वैपायनोऽपरो ब्रह्मा तत्सृष्टिर्भारतार्णवः ।
सूक्तयो दिव्यरत्नानि त्रैलोक्यं तैरलङ्कृतम् ॥
निःश्रेण्यौ ब्रह्मलोकस्य वाग्देव्याः कर्णकुण्डले ।
धर्मद्रुममहामूले वाल्मीकिव्यासयोः कृती ॥
भारतादिपुराणानि श्रीरामचरितानि च ।
त्रिसन्ध्यसवनान्येष सर्वसाधारणो मखः ॥
पुराणरामायणभारतादिक्षीराणि संयोजितभक्तिवत्सैः ।
पुरातनैर्या दुदुहे कवीन्द्रैः सा भारती कामदुघा ममास्तु ॥
श्रीरामायणमाणिक्यं भारतस्वर्णमुद्रितम् ।
न कस्य कुरुते लोके विस्मयोल्लासि मानसम् ॥
रम्या रामायणी यैषा भारती सैव भारती ॥
अर्धनारीश्वरमयी मूर्तिरेकत्र शोभताम् ॥

—कविराजस्य राघवपाण्डवीये १. ७, ९, ११, ३९, ४२

व्यासाष्टकस्तोत्रम्

नमो ज्ञानानलशिखापुञ्जपिङ्गजटाभृते ।
कृष्णायाकृष्णमहसे कृष्णद्वैपायनाय ते ॥

नमस्तेजोमयश्मश्रुप्रभाशबलितत्विषे ।
वक्त्रवागीश्वरीपद्मरजसेवोदितश्रिये ॥

नमः सन्ध्यासमाधाननिष्पीतरवितेजसे ।
त्रैलोक्यतिमिरोच्छेददीपप्रतिमचक्षुषे ॥

नमः सहस्रशाखाय धर्मोपवनशाखिने ।
सत्त्वप्रतिष्ठापुष्पाय निर्वाणफलशालिने ॥

नमः कृष्णाजिनजुषे बोधनन्दनवासिने ।
व्यासायेवालिजालेन पुण्यसौरभलिप्सया ॥

नमः शशिकलाकारब्रह्मसूत्रांशुशोभिने ।
श्रिताय हंसकान्त्येव सम्पर्कार्क (र्कात्क ?) मलौकसः ॥

नमो विद्यानदीपूर्णशास्त्राब्धिसकलेन्दवे ।
पीयूषरससाराय कविव्यापारवेधसे ॥

नमः सत्यनिवासाय स्वविकासविलासिने ।
व्यासाय धाम्ने तपसां संसारायासहारिणे ॥

—क्षेमेन्द्रस्य भारतमञ्जर्याम् पृष्ठ. ८५०-१.श्लो. १३—२०

सुकलितवेदव्यसनो रचितमहाभारतो विमुक्तिधरः ।
वाण्याधिष्ठितकण्ठः स जयति कृष्णो मुनिर्जगति ॥

—विश्वेश्वरपण्डितस्य आर्यासप्तशत्याम् ३०

अरुन्धतीजानिकुलावतंसः कथं नु वर्ण्यः स कविप्रवेकः ।
यदुक्तिगुम्फाद्यतयो यथावद्विदुः परं तत्त्वमतीतवेदम् ॥

कवेः प्रतिष्ठा भुवि कापि तस्य विजृम्भते पञ्चमवेदकर्तुः ।
अज्ञातयत्सूत्रपदार्थतत्त्वा मनीषिणो नैकमता भवन्ति ॥

—यज्ञनारायणदीक्षितविरचिते साहित्यरत्नाकरकाव्ये १. १७, १८

व्यासमेव स्तुमो नित्यं वाचं गणयितुं विधिः ।
विषीदति वृषाङ्केण विलूने पञ्चमानने ॥

—नीलकण्ठदीक्षितस्य गङ्गावतरणे १.२.

उत्तालशब्दोचितचारुपादन्यासा विचित्राभिनयव्यवस्था ।
वैयासिकी भारतवासनाढ्या सरस्वती दीव्यति लासिकेव ॥

—राजचूडामणिदीक्षितस्य रुक्मिणीकल्याणमहाकाव्ये १. ७

सज्जनाम्भोरुहपुषे वेदव्यासाभिधाजुषे ।
तमस्तोममुषे तस्मै परस्मै ज्योतिषे नमः ॥

—सुमतीन्द्रयतेः उषाहरणटीकायाम्

भजे पराशरसुतं पञ्चमं वदनं विधेः ।
उदभून्निगमो यस्मात् पञ्चमो भारतात्मना ॥

—चक्रकवेः जानकीपरिणये १. ७

व्यासं भारतकर्तारं मध्वमूलगुरुं तथा ।
चेतो वाग्देवतां वाणीं गुरुं च प्रणमाम्यहम् ॥

—आनन्दतीर्थीयमकभारतटीकायाम्
G.O. Mss. Library, Madras D.No. 11890

यदास्यचन्द्रच्युतवाक्सुधारसो
बभूव तं सर्वपुराणरूपभृत् ।

विभाति शूद्रोऽपि यदीयकिङ्करो
द्विजार्चितो व्यासमुनिं समाश्रये ॥

—शिवनन्दस्य देवावतरणे. Sarsvati Mahal, Tanjore 3799

साधिष्ठानन्तविद्युद्वलयनवघनच्छायमच्छामितोद्य-
द्विद्योतच्चिन्मयूखप्रसरदमृतसन्दर्भधारासहस्रम् ।
विद्येशं श्रीशमीशं नलिनस(म)दृशं सुप्रसन्नाननाब्जं
व्यासं विज्ञानमूर्तिं सकलगुणनिधिं देवदेवं नमामि ॥

—सङ्ग्रहरामायणव्याख्याने भावरत्नप्रदीपे
G. O. Mss. Library, Madras D. No. 11902

जाते जगति वाल्मीकौ शब्दः कविरिति स्थितः ।
व्यासे जाते कवी चेति कवयश्चेति दण्डिनि ॥

—सूक्तिमुक्तावल्यां कालिदासस्य

यदाननेन्दोरमृतप्रवाहिनी विनिस्सृता पञ्चमवेदचन्द्रिका ।
तमश्च तापं च निहन्ति देहिनां मनु श्रुतीनां व्यसिता स नैकशः ॥

—सूक्तिमुक्तावल्यां सूक्तिसहस्रात्

अज्ञानतिमिरान्धानां विभ्रान्तानां कुमेधसाम् ।
ज्ञानाञ्जनशलाकाभिर्व्यासेनोन्मीलितं जगत् ॥

—व्यासप्रभाषिते
Adyar Ms. XXXIII. F. 28

भारती भारतीभूय यस्य निर्व्याजनिर्मला ।
जगत्पुनीते गङ्गेव तस्मै व्यासाय मे (ते) नमः ॥

—दिवाकरकविचन्द्रस्य भारतामृतकाव्ये
G. O. Mss. Library, Madras R. No. 3002

प्रणेतुमाम्नायनिधीननेकधा दधार यः सत्यवतीतनूजताम् ।
प्रदर्शिताद्वैतपथो विरज्यतां स रज्यतां मय्यनुकम्पया हरिः ॥
महानयं यद्यपि दुस्तरः परैः कवीश्वरैः कौरवकीर्तिसागरः ।
तथापि पाराशरिपादचिन्तनातरीमुरीकृत्य तरीतुमुत्सहे ॥

—दिवाकरकविचन्द्रस्य-भारतामृतकाव्ये
Asiatic Society Catalouge, Calcutta VII. 5181

आख्यातुमर्थं निगमैरनुक्तं कर्तुं तदुक्तं च सुबोधमर्थम् ।
चकार यो भारतसंज्ञमन्यं वेदं भजे तं मुनिसार्वभौमम् ॥

—चक्रकवेः द्रौपदीपरिणयचम्व्वाम्
G. O. Mss. Library, Madras D.No. 12303

मनोज्ञगीतामकरन्दपूर्णं सपादलक्षोज्ज्वलपद्मपत्रम् ।
चक्रे महाभारतपुण्डरीकं यस्तं मुनिं चन्द्रसरस्थमीडे ॥

—लक्ष्मीकाव्ये
G. O. Mss. Library Madras R. No. 1377

व्यासं गिरां मनसि वासमकृत्रिमाणा-
मासङ्किनं तपसि वासितमादधामि ।
ह्यद्यापि भारतकथा सहपादलक्ष-
पद्या यतोऽजनि सपादचतुष्कपद्या ॥

—चिदम्बरकवेः पञ्चकल्याणचम्व्वाम्
G.O. Mss. Library, Madras R. No. 2940 a

आदेशिकौ पद्यपथोद्यतानां रत्नाकरौ सूक्तिमहामणीनाम् ।
सन्मार्गसन्दर्शनपुष्पवन्तौ वन्दे कवीनां प्रथमौ मुनीन्द्रौ ॥

—कृष्णकवेः भरतचरिते
G.O. Mss. Library, Madras R. No.2959

उत्तालशब्दोचितचारुपादन्यासा समुल्लासकराभिनीतिः ।
वाग्वैखरी भारतकृत्यधीना व्यासोदिता दीव्यति लासिकेव ॥

—अभिरामकामाक्षीकवेः अभिनवरामाभ्युदये *
G.O. Mss. Library, Madras R. No. 3489

लक्ष्मीमातनुतात्स वो मुनिवरो व्यासाभिधानोऽनिशं
यः प्रालेयगिरावपान्तरतमोरूपेण नित्यं तपः ।
तन्वानस्य कला हरेरविकला लोकोपकारोद्यता
द्रागस्यन्दत भारतामृतझरी यस्येयमास्येन्दुतः ॥

—मानवेदचम्पूभारते
G.O. Mss. Library, Madras R. No. 1851

नमो भगवते तस्मै व्यासरूपाय विष्णवे ।
यत्प्रसादेन हि ज्ञेयं वस्तु जानन्ति मानवाः ॥

—कृष्णकवेः गोविन्दचरिते
G.O. Mss. Library, Madras R.No. 76

शास्त्रेषु सत्स्वपि कलास्वपि तादृशीषु
काव्ये स्थितं मम मनः कृपयाम्बिकायाः ।
वाल्मीकितापसवरश्च पराशरस्य
भाग्यं मुनिश्च भुवनेषु कथं प्रसिद्धौ ॥

—रामचंद्रमखिनः रससर्वस्वचम्पूम्
G.O. Mss. Library, Madras R. No. 5226

---

* उपरि २०-पार्श्वे दत्तं राजचूडामणिदीक्षितश्लोकमनुकरोत्ययं श्लोकः

वन्दे सदा व्यासशुकौ महर्षीन् वाल्मीकिसद्गौतमनारदादीन् ।
येषां पुराणादिवचो निशम्य जगज्जना मोक्षपदं लभन्ते ॥

—गोपीनाथकविभूषणस्य कविचिन्तामणौ
G.O. Mss. Library. Madras R. No. 2925

सद्गुणमालं व्यासं नौमि च विद्यास्थिरायमालम्ब्यासम् ।
यो भृशमस्तव्यस्ता वेदगिरो व्यभजदागमस्तव्यस्ताः ॥
योऽजनि सत्यवतीतः कलुषाल्लोकं कलौ च सत्यवतीतः ।
कथया भारत्या गामकृत स प्राप्तदुरितभारत्यागाम् ॥

—शौरिकथायाम्
Curator's Office Catalogue, Trivandrum C 1443

आम्नायार्थप्रबोधार्थं सर्वेषां येन भारतम् ।
सर्वज्ञेन समाख्यातं तं नमामि मुनीश्वरम् ॥

—पाण्डवचरिते
Curator's Office Catalogue, Trivandrum B. 1474.

सदाखिलाभिस्सहितः कलाभिः द्वैपायनेन्दुः कृतिरश्मिजालैः ।
हरन् जगन्मोहमहान्धकारमानन्दमस्पृष्टतमा दिशेन्नः ॥

—रामवर्मणो भारतसङ्ग्रहे
G. O. Mss. Library, Madras R. No. 4483

यतस्सत्ता स्फुरत्ता च विश्वस्यैव परात्मनः ।
भारतस्यास्य वंशस्य तं नमामि मुनीश्वरम् ॥
सर्वमङ्गल्यजालं मे सर्वज्ञः कुरुतां मुनिः ।
वेदव्यासो मुनिश्रेष्ठः पाराशर्यो महत्तरः ॥

—सङ्क्षेपभारते
G. O. Mss. Library, Madras R. No. 2895

श्रीमद्भारतदुग्धसिन्धुरमलः पाञ्चालिकामःपरः (लिकाकामदः?)
कुन्तीपुत्रयुधिष्ठिरामरतरुर्वातात्मजैरावतः ।
श्वेताश्वेन्द्रतुरङ्गमः सुरभिषक्सन्तानशोभामणि-
र्दुर्बुद्धयग्रणिधार्तराष्ट्रगरलः कृष्णामृतः पातु नः ॥

—महेश्वरस्य भारतसंग्रहे
Curator's Office Catalogue, Trivandrum 192

जातं पराशरात्खलु वासव्यां श्रुतिशताब्जमार्तण्डम् ।
नारायणमेव सतां परायणं बादरायणं वन्दे ॥

—देवदेवेशानुभूतियतीनां रामायणामृते
Granthappura Catalogue, Trivandrum VIII. 1930

ब्रह्मणोऽपि महान्व्यासो ब्रह्मा ब्रह्माण्डसम्भवः ।
यत्प्रबन्धमहाम्भोधौ ब्रह्माण्डैर्बुद्बुदायितम् ॥ ९ ॥
परं प्रदीप्यते लोकैश्चन्द्रादर्काच्च भारतम् ।
तमो गृह्णाति चन्द्रार्कौ तन्निगृह्णाति भारतम् ॥ १० ॥

—वामनभट्टबाणस्य रघुनाथचरिते
Sarasvati Mahal, Tanjore 1721

आप्तगीतामृतस्फूर्तिरनुज्झद्भारतान्वया ।
दीव्यति व्यासवाग्गङ्गा देवव्रतगुणोन्मुखी ॥ ४४ ॥

—माधवार्यस्य नरकासुरविजये
Sarasvati Mahal, Tanjore 3801

सभारतासाध्यसुपर्वसिन्धुः स भारताख्यानकविः समिन्धाम् ।
यद्भारतीसारतरप्रवाहैः पवित्रितं भारतवर्षमासीत् ॥

—जीवदेवस्य भक्तिभागवते
G. O. Mss Library, Madras R. No. 1132

प्राचेतसो विजयतां प्रथमः कवीनां
प्राच्यः कविः स च पराशरजो मुनीन्द्रः ।
अद्याप्यशृङ्खलवचोविसरा जगत्यां
मार्गं ययोरनुसरन्ति महाकवीन्द्राः ॥

—रासोत्सवे

G.O. Mss. Library, Madras R. No. 5139

श्रीवेदव्यासाष्टकम्

कलिमलास्तविवेकदिवाकरं समवलोक्य तमोवलितं जनम् ।
करुणया भुवि दर्शितविग्रहं मुनिवरं तमहं सततं भजे ॥१॥

भरतवंशसमुद्धरणेच्छया स्वजननीवचसा परिनोदितः ।
अजनयत्तनयत्रितयं प्रभुः मुनिवरं तमहं सततं भजे ॥ २ ॥

मतिबलादि निरीक्ष्य कलौ नृणां लघुतरं कृपया निगमाम्बुधेः ।
समकरोदिह भागमनेकधा मुनिवरं तमहं सततं भजे ॥ ३ ॥

सकलधर्मनिरूपणसागरं विविधचित्रकथासमलङ्कृतम् ।
व्यरचयच्च पुराणकदम्बकं मुनिवरं तमहं सततं भजे ॥ ४ ॥

श्रुतिविरोधसमन्वयदर्पणं निखिलवादिमतान्ध्यविदारणम् ।
ग्रथितवानपि सूत्रसमूहकं मुनिवरं तमहं सततं भजे ॥ ५ ॥

यदनुभाववशेन दिवं गतः समधिगम्य महास्त्रसमुच्चयम् ।
कुरुचमूमजयद्विजयो द्रुतं मुनिवरं तमहं सततं भजे ॥ ६ ॥

समरवृत्तविबोधसमीहया कुरुवरेण मुदा कृतयाचनः ।
सपदि सूतमदादमलेक्षणं मुनिवरं तमहं सततं भजे ॥ ७ ॥

वननिवासपरौ कुरुदम्पती सुतशुचा तपसा च विकर्शितौ ।
मृततनूजगणं समदर्शयत् मुनिवरं तमहं सततं भजे ॥ ८ ॥
व्यासाष्टकमिदं पुण्यं ब्रह्मानन्देन कीर्तितम् ।
यः पठेन्मनुजो नित्यं स भवेच्छास्त्रपारगः ॥
श्रीपरमहंसस्वामिब्रह्मानन्दविरचितं श्रीवेदव्यासाष्टकं संपूर्णम् ॥

वेदान्तार्थसरोजेषु सहस्रांशुरिवापरः ।
भासते व्याससंज्ञोऽयं तं वन्दे हरिमीश्वरम् ॥

—व्यासपूजामातृकायाम्
Sarasvati Mahal, Tanjore 14879

अपान्तरतमा नाम वेदाचार्यः पुराणर्षिः विष्णुनियोगात् कलिद्वापरयोस्सन्धौ कृष्णद्वैपायनस्संबभूव इति स्मरन्ति। तेषाम् अपान्तरतमःप्रभृतीनां वेदप्रवर्तनादिषु लोकस्थितिहेतुषु अधिकारेषु नियुक्तानाम् अधिकारतन्त्रत्वात् स्थितेः ।

—ब्रह्मसूत्रशाङ्करभाष्ये ३. ३. ३२

सर्वशास्त्राविरोधेन व्यासोक्तो भारते द्विजैः ।
गृह्यते साङ्ख्यपक्षाद्धि वेदसारोऽथ वैदिकैः ॥

—शङ्कराचार्यविरचिते सर्वदर्शनसिद्धान्तसंग्रहे वेदव्यासपक्षप्रकरणे

नमः श्रुतिशिरःपद्मषण्डमार्तण्डमूर्तये ।
बादरायणसंज्ञाय मुनये शमवेश्मने ॥

—पद्मपादाचार्याणां ब्रह्मसूत्रव्याख्यायां पञ्चपादिकायाम् उपक्रमे श्लो. २

जन्मबन्धविनिवृत्तिकारणं ब्रह्मसूत्रमिदमुद्बभौ यतः ।
श्रोतृचित्तकमलैकभास्करं बादरायणमृषिं नमामि तम् ॥

—भास्करकृतब्रह्मसूत्रभाष्योपक्रमे

श्यामोऽपि श्रुतिकमलावबोधरागः
शान्तः सन्नयति तमोविनाशमन्तः ।
नीरूपं प्रथयति योऽपि गोसहस्रै-
स्तं व्यासं नमत जगत्यपूर्वभानुम् ॥

—प्रकाशात्मयतीनां पञ्चपादिकाविवरणे उपक्रमे श्लो. ४

ब्रह्मसूत्रकृते तस्मै वेदव्यासाय वेधसे ।
ज्ञानशक्त्यवताराय नमो भगवतो हरेः ॥

—वाचस्पतिमिश्राणां भामत्याम् उपक्रमे श्लो. ५

यन्न्यायसूत्रग्रथितात्मबोधसौरभ्यगर्भश्रुतिपद्ममाला ।
प्रसाधयत्यद्वयमात्मतत्त्वं तं व्यासमाद्यं गुरुमानतोऽस्मि ॥

—अमलानन्दस्य भामतीव्याख्याने कल्पतरौ उपक्रमे श्लो. ६

विष्णवे व्यासरूपाय ब्रह्मसूत्रकृते नमः ।
महेशाय च तद्भाष्यकृते शङ्कररूपिणे ॥

यद्ग्रन्थकवचयोगात् पक्षो व्यासस्य विजयते जगति ।
विद्रुतविरोधिवर्गो वाचस्पतये नमस्तस्मै ॥

अक्षुण्णायामरण्यान्यां भामत्यां वर्त्म यो व्यधात् ।
सुगमं प्रणमामस्तं व्यासाश्रममुनीश्वरम् ॥

—श्रीमदल्लालसूरिविरचिते भामतीतिलके
G. O. Mss. Library, Madras R. No. 3282

"मन्नियोगाद्धरिः साक्षादतीव श्रद्धयान्वितः ।
कृष्णद्वैपायनो भूत्वा ब्रह्मचारी जितेन्द्रियः ॥

वेदान्तानां प्रतिष्ठार्थं मुने सूत्रं करिष्यति।"

—ब्रह्मसूत्रशाङ्करभाष्यविवृतौ शिववचनम्
Curator's Office Catalogue, Trivandrum 379

हरिहरलीलावपुषौ परमेशौ व्यासशंकरौ नत्वा।
वाचस्पतिमतिबिम्बितमादर्शं प्रारभे विमलम्॥

—अमलानन्दस्य शास्त्रदर्पणे उपक्रमे श्लो. २

वाग्विस्तरा यस्य बृहत्तरङ्गा
वेलातटं वस्तुनि तत्त्वबोधः।
रत्नानि तर्कप्रसरप्रकाराः
पुनात्वसौ व्यासपयोनिधिर्नः॥

—सर्वज्ञात्ममुनेः संक्षेपशारीरके उपक्रमे श्लो. ६

वेदान्तार्थसरोजेषु सहस्रांशुरिवापरः।
भासते व्याससंज्ञो यः तं वन्दे हरिमीश्वरम्॥

—नृसिंहाश्रमविरचितायां संक्षेपशारीरकव्याख्यायां तत्त्वबोधिन्याम् उपक्रमे श्लो. ६

यःसर्वश्रुतिमौलिपद्मनिकरं दोधूयमानं महा-
वादिव्रातसमीरणैः स्वकृतसत्सूत्रावनद्धं स्थिरम्।
चक्रेऽनेकविनेयतोयनिभृतं विष्णोः पदैकायनं
वेदव्यासगिरेरिताय मुनये तस्मै नमो विष्णवे॥

—रामतीर्थस्य संक्षेपशारीरकटीकायाम् अन्वयार्थप्रकाशिकायाम् उपक्रमे श्लो. ६

यो विश्वमेतदखिलं कृपयोद्दधार
वेदान् विभज्य तदुपोद्बलितैः स्ववाक्यैः।

आख्यानकैः सुविततैर्मधुरैः स कृष्ण-
द्वैपायनो विजयतेऽतिपुराणवाक्यः ॥
—बुधरामनाथस्य संक्षेपशारीरकोपक्रमे श्लो. २

दुस्तर्कजालविषकण्टकवृक्षषण्ड-
पाषण्डवादबहुगुल्मलतोपरोधम् ।
निर्धूतमुक्तिपथमुद्धृतकण्टकं य-
श्चक्रे पराशरसुताय नमोऽस्तु तस्मै ॥
—ज्ञानघनाचार्यस्य तत्त्वशुद्धौ उपक्रमे श्लो. २

श्रीमद्व्यासं वासुदेवावतारं
वेदाचार्यं ब्रह्मशारीरकस्य ।
मीमांसायाः सूत्रकर्तारमीडे
शुद्धाद्वैतस्थापकाचार्यवर्यम् ॥
—भेदधिक्कारोपन्यासे
Sarasvati Mahal, Tanjore 7515

श्रीमद्व्यासपयोनिधिर्निधिरसौ सत्सूक्तिपङ्क्तिस्फुरन्-
मुक्तानामनवद्यहृद्यविपुलप्रद्योतिविद्यामणिः ।
क्षान्तिः शान्तिधृती दयेति सरितामेकान्तविश्रान्तिभूः
भूयान्नः सततं मुनीन्द्रमकरश्रेणीश्रयः श्रेयसे ॥
—आनन्दगिरिप्रणीतायां न्यायनिर्णयव्याख्यायाम् उपक्रमे श्लो. ५

वेदविभागविधात्रे विमलाय ब्रह्मणे नमो विश्वदृशे ।
सकलधृतिहेतुसाधनसूत्रसृजे सत्यवत्यभिव्यक्तिमते ॥
—अप्पय्यदीक्षितस्य न्यायरक्षामणौ उपक्रमे श्लो. ५

पिता पराशरो यस्य शुकदेवस्य यः पिता ।
तं व्यासं बदरीवासं कृष्णद्वैपायनं भजे ॥

—सिद्धान्तदर्पणे

नमस्त्रय्यन्तकान्तारविहारैकपटीयसे ।
वादिमत्तेभसंहर्त्रे व्यासकेसरिणे सते ॥

—सदाशिवेन्द्रस्य ब्रह्मसूत्रवृत्तौ ब्रह्मतत्त्वप्रकाशिकायाम् उपक्रमे श्लो. २

आत्मावबोधविधुरं प्रसमीक्ष्य लोक-
मुद्धर्तुमाहृतमना निगमार्थसारम् ।
निश्चित्य सूत्रनिचयं रचयाञ्चकार
श्रीबादरायणमुनिर्भुवनैकमान्यः ॥

—सुब्रह्मण्यस्य शाङ्करभाष्यार्थरत्नमालायाम्

अद्वैतवस्तुप्रतिपादनाय द्वैतस्य मिथ्यात्वविनिश्चयाय ।
यः सूत्ररूपं निबबन्ध शास्त्रं तं व्यासमाद्यं गुरुमानतोऽस्मि ॥

—रघुनाथसूरिविरचिते शांकरपादभूषणे उपक्रमे श्लो. ३

चेतश्शुद्धौ चेतसःस्थैर्यकार्ये
ज्ञानोत्पत्तौ चारुकाण्डत्रयं यत् ।
आम्नायस्यानुक्रमाद्वेदवेत्ता
वेद व्यासस्त्वेकवाक्यत्वसिद्धयै ॥

—माधवाश्रमिविरचिते स्वानुभवादर्शे उपक्रमे श्लो. १७

तावाद्रिये परकृपामयदिव्यदेहौ
दुःखाब्धिगाखिलसमुद्धरणैकदीक्षौ ।

नारायणं परशिवं परमात्मभूतं
व्यासाभिधं जगति शङ्करसंज्ञकं च ॥

—बोधानन्दकृतायां कैवल्यदीपिकायाम्
G. O. Mss. Library, Madras R. No. 2934

यस्य प्रसादलेशेन सूतोऽपि गुरुतां गतः ।
मुनीनां पुण्डरीकाक्षं वेदव्यासमहं भजे ॥

—वेदान्तदीपिकायाम् G. O. Mss. Library, Madras R. No. 1567

वेदयन्वेदसारार्थं खेदयन् हृद्गतं तमः ।
मोदयन् साधुसङ्घातं कृष्णोष्णांशुः प्रसीदतु ॥

—प्रमेयदीपिकाव्याख्यायां प्रकाशे
Sarasvati Mahal, Tanjore 8907

स जयति जैमिनिरादौ जयति पुनः काशकृत्स्नोऽपि।
नारायणावतारो जयति परं बादरायणः श्रीमान् ॥

—पूर्वोत्तरमीमांसैककण्ठ्ये
G. O. Mss. Library, Madras D. No. 4931

वन्दे द्वैपायनाचार्यं तारिताज्ञानमण्डलम् ।
....वेदान्ततत्त्वज्ञं सर्वदेवनमस्कृतम् ॥

—शिवरामकृतायाम् अष्टावक्रसूक्तदीपिकायाम्
India Office Catalogue, London 5974

जिगाय देवानपि यः स्वतेजसा
विवेद च व्यास च वेदसागरम् ।
परावरज्ञः स पराशरात्मजो
मया महात्मा प्रणिपत्यते मुनिः ॥

—जैमिनीयश्रौतसूत्रभाष्ये
G. O. Mss. Library, Madras R. No. 5507

वन्दे मन्देतरगुणमणिग्रामविश्रामभूमिं
नित्यप्रत्यस्तमितनिखिलावद्यरूपान्धकारम् ।
गम्यं सम्यग्विरतिभजनध्यानविज्ञानयोगैः
श्रीशं व्यासं रघुयदुपतिं सत्यविश्वस्य हेतुम् ॥

—ब्रह्मानन्दयतेः न्यायरत्नाकरे
G. O. Mss. Library, Madras R. No. 1615

विश्वरूपं च विश्वेशं विश्वसत्ताप्रदं शिवम् ।
वेदयोनिमहं वन्दे व्यासं वेदार्थसिद्धिदम् ॥

—बोधेन्द्रस्य अद्वैतभूषणे
Sarasvati Mahal, Tanjore 7533

पाराशर्यवचस्सुधामुपनिषद्दुग्धाब्धिमध्योद्धृतां
संसाराग्निविदीपनव्यपगतप्राणात्मसंजीवनीम् ।
पूर्वाचार्यसुरक्षितां बहुमतिव्याघातदूरस्थिता-
मानीतां तु निजाक्षरैः सुमनसो भौमाः पिबन्त्वन्वहम् ॥

—श्रीभाष्ये श्लो.२

अविद्यानलसंतप्तजीवजीवातुरच्युतः ।
कृष्णद्वैपायनो व्यासः स्वसूक्तचमृतदानतः ॥

—रम्यजामातृमुनेः चन्द्रिकाखण्डने
G. O. Mss. Library, Madras R. No. 9

दैवाभ्यर्थनमन्दरेण मथिताद्वक्त्रीन्दिरामूधतः
श्रीमद्भागवताख्यनिर्जरतरुस्सत्सूत्ररत्नोत्करः ।

दीव्यद्वीतिसुधांशुकामृतरुचिर्ज्ञानं च धन्वतरि-
स्स श्रीव्यासमहाम्बुधिर्विजयते प्रीत्यै समन्तात्सताम् ॥

—बलदेवविद्याभूषणस्य सिद्धान्तरत्ने
G. O. Mss. Library, Madras R. No. 2989

अवतीर्णो महायोगी सत्यवत्यां पराशरात् ।
उत्सन्नान् व्यञ्जयन् वेदानुज्जहार हरिः स्वयम् ॥
चतुर्धा व्यभजत्तांश्च चतुर्विंशतिधा पुनः ।
शतधा चैकधा चैव तथैव च सहस्रधा ॥
कृष्णो द्वादशधा चैव पुनस्तस्यार्थवित्तये ।
चकार ब्रह्मसूत्राणि येषां सूत्रत्वमञ्जसा ॥

—आनन्दतीर्थीयब्रह्मसूत्रभाष्ये

अस्यन् विशेषाद्भजतो भवौघान्
व्यस्यन्नृगादींश्च विशिष्ट आस ।
सोऽयं हरिर्व्यासपदाभिधेयः
संप्रीयतां सत्यवतीसुतो मे ॥

—आनन्दतीर्थीयब्रह्मसूत्रभाष्यव्याख्याने त्रिविक्रमकृते तत्त्वप्रदीपे श्लो.३

याच्छामन्दरलोलिताद्यत उदैद्विद्येन्दिरा निर्जरै-
र्जातो भारतपारिजातसुतरुः सद्ब्रह्मसूत्रामृतम् ।
आसीत्तन्त्रपुराणसन्मणिगणो जातः शुकेन्दुः सदा
सोऽयं व्याससुधानिधिर्भवतु मे भूत्यै सतां भूतिदः ॥

—आनन्दतीर्थीयब्रह्मसूत्रभाष्यटीकायां जयतीर्थकृतायां तत्त्वप्रकाशिकायाम्
श्लो.२

सुशास्त्रप्रभया स्वस्य परेषां च प्रकाशकम् ।
भजतामिष्टदं व्यासचिन्तामणिमहं भजे ॥

—रघूत्तमयतिकृते तत्त्वप्रकाशिकाव्याख्याने विवरणोद्धारे
Sarasvati Mahal, Tanjore 7841

ज्ञानभा हृत्तमोहर्ता श्रुतिपङ्कजमोदकः ।
व्यासांशुमान् दर्शयतु सन्मार्गं गुरुमण्डलः ॥

—तत्त्वप्रकाशिकाव्याख्याने
G. O. Mss. Library, Madras R. 1432-b

प्रादुर्भूतो हरिर्व्यासो विरिञ्चिभवपूर्वकैः ।
अर्थितः परविद्याख्यं चक्रे शास्त्रमनुत्तमम् ॥

—आनन्दतीर्थीयब्रह्मसूत्रानुव्याख्याने

येन प्रादुरभावि भूमिवलये व्यस्तारि गोसन्ततिः
प्राबोधि श्रुतिपङ्कजं करुणया प्राकाशि तत्त्वं परम् ।
ध्वान्तं ध्वंसमनायि साधुनिकरश्चाकारि सन्मार्गग-
स्तेन व्यासदिवाकरेण सततं मा त्याजि मे मानसम् ॥

—अनुव्याख्यानटीकायां जयतीर्थकृतायां न्यायसुधायाम्

वासवीवियति व्यक्तं परापरविभासकम् ।
व्यासाभिधमहं(हो) वन्दे महामोहतमोपहम् ॥

—यदुपतिना कृतायां न्यायसुधाटिप्पण्याम्
G. O. Mss. Library, Madras R. No. 1285

दुरन्तदुरितध्वान्तविध्वंसनपटीयसे ।
बादरायणसंज्ञाय परस्मै महसे नमः ॥

—जयतीर्थीयब्रह्मसूत्रानुव्याख्यानन्यायविवरणपञ्जिकायाम्
G. O. Mss. Library, Madras R. No. 573 (j)

स्वभक्तमानसाजन्मनिकरोन्मेषहेतवे ।
विद्यांशुभिन्नतमसे नमोऽस्तु व्यासभानवे ॥

—अनुव्याख्यान्यायविवरणे संबन्धदीपिकायाम्
Sarasvati Mahal, Tanjore 7877

वेदभेदसुशाखेतं बोधादिफलसंयुतम् ।
भजतामिष्टदं व्याससुरद्रुममहं भजे ॥
निरस्तं हृत्तमो येन प्रशस्तं सन्मनोम्बुजम् ।
समस्तं भासितं वन्दे वेदव्यासदिवाकरम् ॥

—आनन्दतीर्थकृतछान्दोग्यभाष्यटीकायां पदार्थकौमुद्याम्
G. O. Mss. Library, Madras R. No. 864

वासवीहृदयानन्दं वेदशाखाप्रणायकम् ।
वेदव्यासं गुरूपास्यं वन्देऽभीष्टप्रदं सताम् ॥
श्रीरामं हनुमत्सेव्यं श्रीकृष्णं भीमसेवितम् ।
श्रीव्यासं श्रीमदानन्दतीर्थसंसेव्यमाभजे ॥

—व्यासयतिना कृतायां न्यायामृतव्याख्यायाम्
G. O. Mss. Library, Madras R. No. 855

प्रमाणजातैरवबुध्य यस्य सारं पदं त्यक्तभवा भजन्ते ।
जना निजानन्दपदेच्छवोऽलं तं वासवीसूनुमहं प्रपद्ये ॥

—प्रमाणपद्धतिभावविवरणे
BORI. Des. Cat. IX No. 685 1884-87

ज्ञानं यः स्थापयामास देवमानवपक्षिषु ।
ज्ञानविज्ञानसिद्ध्यर्थं वेदव्यासमहं भजे ॥

—सत्यनाथीये अभिनवतर्कताण्डवे
Sarasvati Mahal, Tanjore 8098

विभज्य वेदान् यस्सूत्रं चक्रे वेदार्थवित्तये ।
प्रार्थितो ब्रह्मरुद्राद्यैर्नमो व्यासाय विष्णवे ॥

—सत्यनाथतीर्थकृततत्त्वप्रकाशिकाव्याख्यायाम् अभिनवचन्द्रिकायां श्लो. ३

२. महाभारतम्

नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं चैव (व्यासं) ततो जयमुदीरयेत् ॥

—महा भा. १. १. १. भागवते १. २. ४. अन्येषु पुराणेषु च

पाराशर्यवचस्सरोजममलं गीतार्थगन्धोत्कटं
नानाख्यानककेसरं हरिकथासंबोधनाबोधितम् ।
लोके सज्जनषट्पदैरहरहः पेपीयमानं मुदा
भूयाद्भारतपङ्कजं कलिमलप्रध्वंसि नः श्रेयसे ॥

—पूना म. भा fn. p. 3. भविष्य. १. १. ४

द्वैपायनेन यत्प्रोक्तं पुराणं परमर्षिणा ।
सुरैर्ब्रह्मर्षिभिश्चैव श्रुत्वा यदभिपूजितम् ॥
तस्याख्यानवरिष्ठस्य विचित्रपदपर्वणः ।
सूक्ष्मार्थन्याययुक्तस्य वेदार्थैर्भूषितस्य च ॥
भारतस्येतिहासस्य पुण्यां ग्रन्थार्थसंयुताम् ।
संस्कारोपगतां ब्राह्मीं नानाशास्त्रोपबृंहिताम् ॥
जनमेजयस्य यां राज्ञो वैशम्पायन उक्तवान् ।
यथावत्स ऋषिस्तुष्ट्या सत्रे द्वैपायनाज्ञया ॥

वेदैश्चतुर्भिस्समितां व्यासस्यादभुतकर्मणः ।
संहितां श्रोतुमिच्छामो धर्म्यां पापभयापहाम् ॥

—पूना म. भा. १. १. १५—१९

इदं तु त्रिषु लोकेषु महज्ज्ञानं प्रतिष्ठितम् ।
विस्तरैश्च समासैश्च धार्यते यद्द्विजातिभिः ॥
अलङ्कृतं शुभैश्शब्दैः समयैर्दिव्यमानुषैः ।
छन्दोवृत्तैश्च विविधैरन्वितं विदुषां प्रियम् ॥

—पूना म. भा. १. १. २५, २६

तपसा ब्रह्मचर्येण व्यस्य वेदं सनातनम् ।
इतिहासमिमं चक्रे पुण्यं सत्यवतीसुतः ॥

—कुम्भ. म. भा. १. १. ३८

सर्वेषां कविमुख्यानामुपजीव्यो भविष्यति ।
पर्जन्य इव भूतानामक्षयो भारतद्रुमः ॥

—कुम्भ. म. भा. १. १. १०८

अत्रोपनिषदं पुण्यां कृष्णद्वैपायनोऽब्रवीत् ।
भारताध्ययनात्पुण्यादपि पादमधीयतः ।
श्रद्धधानस्य पूयन्ते सर्वपापान्यशेषतः ॥
देवर्षयो यत्र पुण्या ब्रह्मराजर्षयस्तथा ।
कीर्त्यन्ते शुभकर्माणस्तथा यक्षमहोरगाः ॥
भगवान्वासुदेवश्च कीर्त्यतेऽत्र सनातनः ।
स हि सत्यमृतं चैव पवित्रं पुण्यमेव च ॥

शाश्वतं ब्रह्म परमं ध्रुवं ज्योतिस्सनातनम् ।
यस्य दिव्यानि कर्माणि कथयन्ति मनीषिणः ॥

असत्सत्सदसच्चैव यस्माद्देवात्प्रवर्तते ।
सन्ततिश्च प्रवृत्तिश्च जन्म मृत्युः पुनर्भवः ॥

अध्यात्मं श्रूयते यच्च पञ्चभूतगुणात्मकम् ।
अव्यक्तादि परं यच्च स एव परिगीयते ॥

—पूना म. भा. १. १. १९१-१९६

भारतं भानुमानिन्दुर्यदि न स्युरमी त्रयः ।
अज्ञानतिमिरान्धस्य कावस्था जगतो भवेत् ॥

—पूना म. भा. तः १. fn. p. 30. पद्म. ५. १. ४२

भारतस्य वपुर्ह्येतत्सत्यं चामृतमेव च ।
नवनीतं यथा दध्नो द्विपदां ब्राह्मणो यथा ॥

ह्रदानामुदधिः श्रेष्ठो गौर्वरिष्ठा चतुष्पदाम् ।
यथैतानि वरिष्ठानि तथा भारतमुच्यते ॥

यश्चैनं श्रावयेच्छ्राद्धे ब्राह्मणान् पादमन्ततः ।
अक्षय्यमन्नपानं तत्पितॄंस्तस्योपतिष्ठति ॥

इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् ।
बिभेत्यल्पश्रुताद्वेदो मामयं प्रतरिष्यति ॥

काष्णं वेदमिमं विद्वान् श्रावयित्वार्थमश्नुते ।
भ्रूणहत्याकृतं चापि पापं जह्यान्न संशयः ॥

य इमं शुचिरध्यायं पठेत्पर्वणि पर्वणि ।
अधीतं भारतं तेन कृत्स्नं स्यादिति मे मतिः ॥
यश्चेमं शृणुयान्नित्यमार्षं श्रद्धासमन्वितः ।
स दीर्घमायुः कीर्तिं च स्वर्गतिं चाप्नुयान्नरः ॥
चत्वार एकतो वेदा भारतं चैकमेकतः ।
समागतैः सुरर्षिभिस्तुलामारोपितं पुरा ।
महत्त्वे च गुरुत्वे च ध्रियमाणं ततोऽधिकम् ॥
महत्त्वाद्भारवात्वाच्च महाभारतमुच्यते ।
निरुक्तमस्य यो वेद सर्वपापैः प्रमुच्यते ॥

—पूना म. भा. १. १. २०१-२०९

यो विद्याच्चतुरो वेदान्साङ्गोपनिषदान् द्विजः ।
न चाख्यानमिदं विद्यान्नैव स स्याद्विचक्षणः ॥
श्रुत्वा त्विदमुपाख्यानं श्राव्यमन्यन्न रोचते ।
पुंस्कोकिलरुतं श्रुत्वा रूक्षा ध्वाङ्क्षस्य वागिव ॥
इतिहासोत्तमादस्माज्जायन्ते कविबुद्धयः ।
पञ्चभ्य इव भूतेभ्यो लोकसंविधयस्त्रयः ॥
अस्याख्यानस्य विषये पुराणं वर्तते द्विजाः ।
अन्तरिक्षस्य विषये प्रजा इव चतुर्विधाः ॥
क्रियागुणानां सर्वेषामिदमाख्यानमाश्रयः ।
इन्द्रियाणां समस्तानां चित्रा इव मनःक्रियाः ॥

अनाश्रित्यैतदाख्यानं कथा भुवि न विद्यते ।
आहारमनपाश्रित्य शरीरस्येव धारणम् ॥
इदं सर्वैः कविवरैराख्यानमुपजीव्यते ।
उदयप्रेप्सुभर्भृत्यैरभिजात इवेश्वरः ॥

द्वैपायनोष्ठपुटनिस्सृतमप्रमेयं
पुण्यं पवित्रमथ पापहरं शिवं च ।
यो भारतं समधिगच्छति वाच्यमानं
किं तस्य पुष्करजलैरभिषेचनेन ॥

—पूना म. भा. १. २. २३५-२४२

यो गोशतं कनकशृङ्गमयं ददाति
विप्राय वेदविदुषे सुबहुश्रुताय ।
पुण्यां च भारतकथां सततं शृणोति
तुल्यं फलं भवति तस्य च तस्य चैव ॥

—कुम्भ. म. भा. १. २. ३९६. स्वर्ग. ५. ८०, ८१

इदं शतसहस्रं हि श्लोकानां पुण्यकर्मणाम् ।
सत्यवत्यात्मजेनेह व्याख्यातममितौजसा ॥
य इदं श्रावयेद्विद्वान्यश्चेदं शृणुयान्नरः ।
ते ब्रह्मणः स्थानमेत्य प्राप्नुयुर्देवतुल्यताम् ॥
इदं हि वेदैस्समितं पवित्रमपि चोत्तमम् ।
श्राव्याणामुत्तमं चेदं पुराणमृषिसंस्तुतम् ॥
अस्मिन्नर्थश्च कामश्च निखिलेनोपदिश्यते ।
इतिहासे महापुण्ये बुद्धिश्च परिनैष्ठिकी ॥

अक्षुद्रान्दानशीलांश्च सत्यशीलाननास्तिकान् ।
काष्णं वेदमिमं विद्वाञ् श्रावयित्वार्थमश्नुते ॥
भ्रूणहत्याकृतं चापि पापं जह्यादसंशयम् ।
इतिहासमिमं श्रुत्वा पुरुषोऽपि सुदारुणः ॥
जयो नामेतिहासोऽयं श्रोतव्यो विजिगीषुणा ।
महीं विजयते सर्वां शत्रूंश्चापि पराजयेत् ॥
इदं पुंसवनं श्रेष्ठमिदं स्वस्त्ययनं महत् ।
महिषीयुवराजाभ्यां श्रोतव्यं बहुशस्तथा ॥
अर्थशास्त्रमिदं पुण्यं धर्मशास्त्रमिदं परम् ।
मोक्षशास्त्रमिदं प्रोक्तं व्यासेनामितबुद्धिना ॥
संप्रत्याचक्षते चैव आख्यास्यन्ति तथापरे ।
पुत्राः शुश्रूषवस्सन्ति प्रेष्याश्च प्रियकारिणः ॥
शरीरेण कृतं पापं वाचा च मनसैव च ।
सर्वं तत्त्यजति क्षिप्रमिदं शृण्वन्नरः सदा ॥
भारतानां महज्जन्म शृण्वतामनसूयताम् ।
नास्ति व्याधिभयं तेषां परलोकभयं कुतः ॥
धन्यं यशस्यमायुष्यं स्वर्ग्यं पुण्यं तथैव च ।
कृष्णद्वैपायनेनेदं कृतं पुण्यचिकीर्षुणा ॥
कीर्तिं प्रथयता लोके पाण्डवानां महात्मनाम् ।
येषां क्षत्रियाणां च भूरिद्रविणतेजसाम् ॥

यथा समुद्रो भगवान्यथा च हिमवान् गिरिः ।
ख्यातावुभौ रत्ननिधी तथा भारतमुच्यते ॥
य इदं श्रावयेद्विद्वान्ब्राह्मणानिह पर्वसु ।
धूतपाप्मा जितस्वर्गो ब्रह्मभूयं स गच्छति ॥
यश्चेदं श्रावयेच्छ्राद्धे ब्राह्मणान्पादमन्ततः ।
अक्षय्यं तस्य तच्छ्राद्धमुपतिष्ठेत्पितॄनपि ॥
अह्ना यदेनश्चाज्ञानात्प्रकरोति नरश्चरन् ।
तन्महाभारताख्यानं श्रुत्वैव प्रविलीयते ॥
भारतानां महज्जन्म महाभारतमुच्यते ।
निरुक्तमस्य यो वेद सर्वपापैः प्रमुच्यते ॥
त्रिभिर्वर्षैस्सदोत्थायी कृष्णद्वैपायनो मुनिः ।
महाभारतयाख्यानं कृतवानिदमुत्तमम् ॥
धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ ।
यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित् ॥

—पूना म. भा. १. ५६. १३-३३

भाति सर्वेषु वेदेषु रतिः सर्वेषु जन्तुषु ।
तरणं सर्वलोकानां तस्माद्भारतमुच्यते ॥

— पूना म. भा. अनुबन्धः १. पृष्ठ ८८५

ऊर्ध्वबाहुर्विरौम्येष न च कश्चिच्छृणोति मे ।
धर्मादर्थश्च कामश्च स किमर्थं न सेव्यते ॥

न जातु कामान्न भयान्न लोभा-
द्धर्मं त्यजेज्जीवितस्यापि हेतोः ।
नित्यो धर्मः सुखदुःखे त्वनित्ये
जीवो नित्यो हेतुरस्य त्वनित्यः ॥
इमां भारतसावित्रीं प्रातरुत्थाय यः पठेत् ।
स भारतफलं प्राप्य परं ब्रह्माधिगच्छति ॥

—कुम्भ. म. भा. स्वर्गा. ५. ७५-७७

भारतश्रवणे राजन् पारणे च नृपोत्तम ।
सदा यत्नवता भाव्यं श्रेयस्तु परमिच्छता ॥
भारतं शृणुयान्नित्यं भारतं परिकीर्तयेत् ।
भारतं भवने यस्य तस्य हस्तगतो जयः ॥
भारतं परमं पुण्यं भारते विविधाः कथाः ।
भारतं सेव्यते देवैर्भारतं परिकीर्तयेत् ॥
भारतं सर्वशास्त्राणामुत्तमं भरतर्षभ ।
भारतात्प्राप्यते मोक्षस्तत्त्वमेतद्ब्रवीमि ते ॥
महाभारतमाख्यानं क्षितिं गां च सरस्वतीम् ।
ब्राह्मणं केशवं चापि कीर्तयन्नावसीदति ॥
वेदे रामायणे पुण्ये भारते भरतर्षभ ।
आदौ चान्ते च मध्ये च हरिः सर्वत्र गीयते ॥

—हरिवंशे ३. १३२. ९०-९५

भारतस्य च विस्तारो मुनिना व्याहृतः स्वयम् ।
यथा स्वादु च पथ्यं च दद्यात्स्वं भिषगौषधम् ॥
तथा रम्यं च शास्त्रं च भारतं कृतवान् मुनिः ।
आस्तिक्यारोहसोपानमेतद्भारतमुच्यते ॥
तच्छ्रुत्वा स्वर्गनरकौ लोकःसाक्षादवेक्षते ।
देवतातीर्थतपसां भारतादेव निश्चयः ॥
न जन्यते नास्तिकता तस्य मीमांसकैरपि ।
विष्णौ देवेषु वेदेषु गुरुषु ब्राह्मणेषु च ॥
भक्तिर्भवति कल्याणी भारतादेव धीमताम् ।
धर्मार्थिकाममोक्षाणां भारतात्सिद्धिरेव हि ॥
अजिह्मो भारतः पन्था निर्वाणपदगामिनाम् ।
मोक्षधर्मार्थकामानां प्रपञ्चो भारते कृतः ॥
एवंविधं भारतं वै प्रोक्तं येन महात्मना ।
सोऽयं नारायणः साक्षाव्यासरूपी महामुनिः ॥

—भविष्यपु. १. १. १८-२४, २६

अष्टादशपुराणानि अष्टौ व्याकरणानि च ।
ज्ञात्वा सत्यवतीसूनुश्चक्रे भारतसंहिताम् ॥
यां श्रुत्वा पुरुषो राजन् मुच्यते ब्रह्महत्यया ।

—भविष्यपु. १. १. ५८-५९

भगवन् भारताख्यानं व्यासेनोक्तं महात्मना ।
पूर्णमस्तमलैः शुभ्रैर्नानाशास्त्रसमुच्चयैः ॥

जातिशुद्धिसमायुक्तं साधुशब्दोपशोभितम् ।
पूर्वपक्षोक्तिसिद्धान्तपरिनिष्ठासमन्वितम् ॥
त्रिदशानां यथा विष्णुर्द्विपदां ब्राह्मणो यथा ।
भूषणानां च सर्वेषां यथा चूडामणिर्वरः ॥
यथायुधानां कुलिशमिन्द्रियाणां यथा मनः ।
तथेह सर्वशास्त्राणां महाभारतमुत्तमम् ॥
अत्रार्थश्चैव धर्मश्च कामो मोक्षश्च वर्ण्यते ।
परस्परानुबन्धाश्च सानुबन्धाश्च ते पृथक् ॥
धर्मशास्त्रमिदं श्रेष्ठमर्थशास्त्रमिदं परम् ।
कामशास्त्रमिदं चाग्र्यं मोक्षशास्त्रं तथोत्तमम् ॥
चतुराश्रमधर्माणामाचारस्थितिसाधनम् ।
प्रोक्तमेतन्महाभाग वेदव्यासेन धीमता ॥
तथा तात कृतं ह्येतद्व्यासेनोदारकर्मणा ।
यथा व्यासं महाशास्त्रं विरोधैर्नाभिभूयते ॥
व्यासवाक्यजलौघेन कुतर्ककरुहारिणा ।
वेदशैलावतीर्णेन नीरजस्का मही कृता ॥
कलशब्दमहाहंसं महाख्यानपराम्बुजम् ।
कथाविस्तीर्णसलिलं कार्ष्णं वेदं महाह्रदम् ॥
तदिदं भारताख्यानं बह्वर्थं श्रुतिविस्तरम् ।

—मार्कण्डेये १. २-१२

किं कवेस्तस्य काव्येन सर्ववृत्तान्तगामिनी ।
कथेव भारती यस्य न व्याप्नोति जगत्त्रयम् ॥

—बाणभट्टस्य हर्षचरिते १. ९

व्यासगिरां निर्यासं सारं विश्वस्य भारतं वन्दे ।
भूषणतयैव संज्ञां यदङ्कितां भारती वहति ॥

श्रीरामायणभारतबृहत्कथानां कवीन्नमस्कुर्मः ।
त्रिस्रोता इव सरसा सरस्वती स्फुरति यैर्भिन्ना ॥

—गोवर्धनाचार्यविरचितायाम् आर्यासप्तशत्याम् ३१. ३४

वैयासिके गिरां गुम्फे पुण्ड्रेक्षाविव लभ्यते ।
सद्यः सहृदयाह्लादी सारः पर्वणि पर्वणि ॥

—गङ्गादेव्या मधुराविजये १. ६

भारतः पञ्चमो वेदो यः शृणोति नरः सकृत् ।
धर्मार्थकाममोक्षाणां परमार्थं स गच्छति ॥

विघ्नराजेन लिखितं व्यासेन कथितं पुरा ।
स्वविषाणेन हेमाद्रौ शृणुयाद्भारतार्णवम् ॥

—महेश्वरकृते भारतसंग्रहे
Curator's Office Catalogue, Trivandrum 192

भारतं चेक्षुदण्डं च सिन्धुमिन्दुं च वर्णय ।
पादमेकं प्रदास्यामि 'प्रतिपर्व रसोदयः' ॥

—मु. र. भाण्डागारे

---

३. पुराणम्

ऋचः सामानि छन्दांसि पुराणं यजुषा सह ।
उच्छिष्टाज्जज्ञिरे सर्वे दिवि देवा दिविश्रितः ॥

—अथर्व. ११. ७. २४

अस्य महतो भूतस्य निश्वसितमेतद्यद्ऋग्वेदो यजुर्वेदः
सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणम् ॥

—बृहदारण्यके २. ४. १०

यस्मिन् श्रुते श्रुतं सर्वं ज्ञाते ज्ञातं कृते कृतम् ॥
वर्णाश्रमाचारधर्मं साक्षात्कारमुपैष्यति ।
शृणु वत्स प्रवक्ष्यामि पुराणानां समुच्चयम् ।
यस्मिञ्ज्ञाते भवेज्ज्ञातं वाङ्मयं सचराचरम् ॥

—बृहन्नार. पूर्व. ९२. ९, १०, २१

पुराणश्रवणे बुद्धिर्यस्य पुंसः प्रवर्तते ॥
पुरार्जितानि पापानि तस्य नश्यन्त्यसंशयम् ।
वेदार्थश्रवणे शुद्धिः पुराणश्रवणे तथा ।
सत्सङ्गेऽपि च यस्यास्ति सोऽपि वन्द्यः सुरोत्तमैः ॥

सर्ववेदार्थसाराणि पुराणानीति भूपते ॥
तर्कस्तु वादहेतुः स्यान्नीतिस्त्वैहिकसाधनम् ।
पुराणानि महाबुद्धे इहामुत्र सुखाय हि ॥

अष्टादश पुराणानि यः शृणोति नरोत्तमः ।
कथयेद्वा विधानेन नेह भूयस्स जायते ॥

—नारदीयपु. १. १. ६१, ६२., १. ३. ६२., १. ९. ९७., १. ९. १००.,
१. १०९. ३९

वेदार्थादधिकं मन्ये पुराणार्थं वरानने ।
वेदाः प्रतिष्ठितास्सर्वे पुराणे नात्र संशयः ॥

—नारदीय पु. २. २४. १७

निस्ताराय तु लोकानां स्वयं नारायणः प्रभुः ।
व्यासरूपेण कृतवान् पुराणानि महीतले ॥

पठनाच्छ्रवणाद्येषां नृणां पापक्षयो भवेत् ।
धर्माधर्मपरिज्ञानं सदाचारप्रवर्तनम् ।
गतिश्च परमा तद्वद्भक्तिर्भगवति प्रभौ ॥

—पद्मपुराणे इति शब्दकल्पद्रुमे पुराण-शब्दार्थविवरणे १७९

यो विद्याच्चतुरो वेदान् साङ्गोपनिषदो द्विजः ।
न चेत् पुराणं संविद्यान्नैव स स्याद्विचक्षणः ॥

इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् ।
बिभेत्यल्पश्रुताद्वेदो मामयं प्रहरिष्यति ॥

—ब्रह्माण्डपु. प्रक्रि. १. १७०, १७१

इतिहासपुराणानि पञ्चमं वेदमीश्वरः ।
सर्वेभ्य एव वक्त्रेभ्यः ससृजे सर्वदर्शनः ॥

—भागवते ३. १२. ३९

पुराणं सर्वशास्त्राणां प्रथमं ब्रह्मणा स्मृतम् ।
अनन्तरं च वक्त्रेभ्यो वेदास्तस्य विनिर्गताः ॥
पुराणमेकमेवासीत्तदा कल्पान्तरेऽनघ ।
त्रिवर्गसाधनं पुण्यं शतकोटिप्रविस्तरम् ॥

—मत्स्यपु. ५३. ३. ४

धर्मश्चार्थश्च कामश्च मोक्षश्चैवात्र कीर्त्यते ।
सर्वेष्वपि पुराणेषु तद्विरुद्धं च यत्फलम् (तद्विरूढे च यत्फलम्)॥

—मत्स्यपु. ५३. ६७; स्कन्दपु. प्रभासख. प्रभासक्षे. २. ६८

यथा पापानि पूयन्ते गङ्गावारिविगाहनात् ।
तथा पुराणश्रवणाद्दुरितानां विनाशनम् ॥

—वामनपु. ९५. ८६

विशेषतः कलौ व्यास पुराणश्रवणादृते ।
परो धर्मो न पुंसां हि मुक्तिध्यानपरः स्मृतः ॥
या गतिः पुण्यशीलानां यज्विनां च तपस्विनाम् ।
सा गतिस्सहसा तात पुराणश्रवणात्खलु ॥
ज्ञानावाप्तिर्यदा न स्याद्योगशास्त्राणि यत्नतः ।
अध्येतव्यानि पौराणं शास्त्रं श्रोतव्यमेव च ॥
पापं संक्षीयते नित्यं धर्मश्चैव विवर्धते ।
पुराणश्रवणाज्ज्ञानी न संसारं प्रपद्यते ॥
अत एव पुराणानि श्रोतव्यानि प्रयत्नतः ।
धर्मार्थकामलाभाय मोक्षमार्गाप्तये तथा ॥

यज्ञैर्दानैस्तपोभिस्तु यत्फलं तीर्थसेवया ।
तत्फलं समवाप्नोति पुराणश्रवणान्नरः ॥
न भवेयुः पुराणानि धर्ममार्गेक्षणानि तु ।
यद्यत्र यद्व्रती स्थाता चात्र पारत्रकीं कथाम् ॥
षड्विंशतिपुराणानां मध्येऽप्येकं शृणोति यः ।
पठेद्वा भक्तियुक्तस्तु स मुक्तो नात्र संशयः॥
अन्यो न दृष्टसुखदो हि मार्गः पुराणमार्गो हि सदा वरिष्ठः ।
शास्त्रं विना सर्वमिदं न भाति सूर्येण हीना इव जीवलोकाः ।

—शिवपु. उमासं. १३. ३१, ३५-४१

पुरा तपश्चचारोग्रममराणां पितामहः ।
आविर्भूतास्ततो वेदाः सषडङ्गपदक्रमाः ॥
ततः पुराणमखिलं सर्वशास्त्रमयं ध्रुवम् ।
नित्यशब्दमयं पुण्यं शतकोटिप्रविस्तरम् ॥

—स्कन्दपु. प्रभासख. प्रभासक्षे. २. ३-४

वेदवन्निश्चलं मन्ये पुराणं वै द्विजोत्तमाः ।
वेदाः प्रतिष्ठितास्सर्वे पुराणे नात्र संशयः ॥
यन्न दृष्टं हि वेदेषु न दृष्टं स्मृतिषु द्विजाः ।
उभयोर्यन्न दृष्टं तत्पुराणेषु च गीयते ॥

—स्कन्दपु. प्रभासख. प्रभासक्षे. २. ९०, ९२

आत्मनो वेदविद्या च ईश्वरेण विनिर्मिता ।
शौनकीया च पौराणी धर्मशास्त्रात्मिका च या ॥

तिस्रो विद्या इमा मुख्याः सर्वशास्त्रविनिर्णये ।
पुराणं पञ्चमो वेद इति ब्रह्मानुशासनम् ॥
यो न वेद पुराणं हि न स वेदात्र किञ्चन ।
कतमः स हि धर्मोऽस्ति किं वा ज्ञानं तथाविधम् ॥
अन्यद्वा तत्किमत्राह पुराणे यन्न दृश्यते ।
वेदाः प्रतिष्ठिताः पूर्वं पुराणे नात्र संशयः ॥
बिभेत्यल्पश्रुताद्वेदो मामयं प्रतरिष्यति ।
इतिहासपुराणैश्च कृतोऽयं निश्चयः पुरा ॥
आत्मा पुराणं वेदानां पृथगङ्गानि तानि षट् ।
यच्च दृष्टं हि वेदेषु तद्दृष्टं स्मृतिभिः किल ॥
उभाभ्यां यत्तु दृष्टं हि तत्पुराणेषु गीयते ।
पुराणं सर्वशास्त्राणां प्रथमं ब्रह्मणः स्मृतम् ॥

—स्कन्दपु. रेवा. १. १७-२३

शुद्धिपट्टिका

पुटः	पङ्क्तिः	शुद्धपाठः
३	९	ब्रह्ममहा
६	५	सत्यवत्यां
१३	४	चक्रे
२५	१	'श्रीमद्भारत' इत्ययं श्लोकः भारतविभागे ४७ पुटे पठनीयः।
३४	१	धन्वन्तरि
३५	२३	विवरण
४१	४	प्रेप्सुभि
४२	२०	अन्येषां
४३	१२	भारतमाख्यानं